ahiṃsā satyam asteyaṃ (Bhāg.-p., XI.19.33)	557	195	147
aho amīṣām kim akāri (Bhāg.-p., V.19.20)	469	165	136
aho citram aho citram (Bṛhannāradīya-p., 32.46)	436	153	133
aho dhairyam aho dhairyam (Bṛhannāradīya-p.,32.57)	438	153	133
aho bāḍhaṁ harer nāma (Bṛhannāradīya-p., 38.98)	348	122	121
aho maughyam aho maughyam (Bṛhānnāradīya-p., 32.62)	437	153	133

Marfat.com

First Words	Śloka Number	Text Page	Résumé Page
aho vata śvapaco'to garīyān (Bhag.-p., III.33.7)	131	50	96
aho vicitraṁ bhagavan (Bhāg -p., V.18.3)	526	184	143
ahny āpṛtārtakaraṇā (Bhāg.-p., III.9.10)	367	128	124
ājñāyaiva guṇān doṣān (Bhāg.-p., XI.11.32)	41	18	85
ātmārāmāśca munayo (Bhāg.-p., I.7.10)	275	99	113
ādimadhyāvasāneṣu (Bhāg.-p., XII.13.11)	549	193	146
āpannah saṁsṛtiṁ ghoram (Bhāg.-p., I.1.14)	127	49	96
āyur harati vai puṁsām (Bhāg.-p., II.3.17)	96	38	91
ālokya sarvaśāstrāṇi (Pāṇḍavī-gītā, 73)	73	30	99
āsurīṁ yonim āpannā (Bhagavadgītā, 13.20)	392	136	127
iti ghoṣayate yamaḥ (Narasiṁha-p., 9.6)	303	109	116
iti mūrtyabhidhānena (Bhāg.-p., I.5.38)	171	65	101
iti sarvāṇi bhūtāni (Bhāg.-p., XI.29.13)	226	83	108
ity acyutāṅghriṁ bhajato (Bhāg.-p., XI.2.43)	182	69	102
idaṁ bhāgavatam pūrvam (Bhāg.-p., XII.13.10)	532	189	144
idaṁ bhāgavataṁ nāma (Bhāg.-p.,II.1.8)	540	191	154
idaṁ hi puṁsas tapasaḥ (Bhāg.-p., I.5.22)	415	146	130
indrasyāśuciśūkarasya ca (Śāntiśataka, 2.37)	499	175	140
indro'pi bhagavadbhaktaḥ (Bhāg.-bhāvārtha-dipīkā, VI.1.1)	301	108	116
imaṁ lokaṁ tathaivamum (Bhāg.-p., III.25.39)	216	80	107
iṣṭaṁ dattaṁ tapo japtam (Bhāg,-p., XI.3.28)	200	75	105
iṣṭveha devatā yajñaih (Bhāg.-p., XI.10.23)	464	163	136
īśvare tadadhīne vā (Bhāg.-p., XI.2.56)	279	101	113
ekaṃ śāstraṁ devakiputragītam (*)	75	30	89
ekas tvam ātmā puruṣaḥ (Bhāg.-p., X.14.23)	53	23	87
ekāntalābhaṁ vacaso (Bhāg.-p., III.6.33)	522	183	143
eta ātmahano'śāntā (Bhāg.-p., XI.5.17)	381	133	125
etad vyāturacittānām (Bhāg.-p., I.6.35)	126	49	95
etan nirvidyamānānām (Bhāg.-p.. II.1.11)	128	49	96
etāḥ saṁsṛtayaḥ puṁso (Bhāg.-p., XI.25.32)	236	86	109
etāvatālam aghanirharaṇāya (Bhāg.-p., VI.3.24)	142	53	97

Marfat.com

First Words	*Śloka Number*	*Text Page*	*Résumé Page*
etāvān eva loke'smin (Bhāg.-p , VI.3.22)	140	53	97
etāvān sāṁkhyayogābhyām (Bhāg.-p., II 1.6)	158	61	99
etenaiva hy aghono (Bhāg.-p , VI 2.8)	135	51	97
ete yamā saniyamā (Bhāg.-p., XI.19.35-36)	559	195	143
etair upadruto nityam (Bhāg.-p., IV.29.41)	511	180	132
evam etān mayādiṣṭān (Bhāg.-p., XI.20.37)	491	172	139
evaṁ puṣpitayā vācā (Bhāg.-p., XI.21.34)	461	162	136
evaṁ prasannamanaso (Bhāg -p., I.2.20)	91	37	91
evaṁvidhaṁ tvām (Bhāg.-p. X.14 24)	54	24	87
evaṁvidhair ahorātrair (Bhāg.-p., III.11.32)	497	174	139
evaṁ vimṛśya sudhiyo (Bhāg.-p., VI.3.26)	306	110	117
evaṁvratah svapriyanāmakīrtyā (Bhāg.-p , XI.2.40)	243	89	110
evaṁ sa viplāvitasarvadharmā (Bhāg.-p., VI.2.45)	145	55	98
eṣā buddhimatām buddhir (Bhāg.-p., XI.29.22)	234	85	108
kaḥ kṣemo nijaparayoḥ (Bhāg.-p., VI.16 42)	404	140	128
karmaṇā karmanirhāro (Bhāg.-p., VI.1.11)	454	159	135
karmaṇāṁ pariṇāmitvād (Bhāg.-p., XI.19.18)	493	173	139
karmaṇy akovidā stabdhā (Bhāg.-p., XI.5.6)	377	132	125
karmaṇy asmin āśvāse (Bhāg.-p., I.18.2)	211	78	106
karmaṇy ārabhamānānām (Bhāg.-p., XI 3 18)	494	174	139
karmabhir bhrāmyamānānām (Bhāg.-p., X.47.67)	320	115	118
kaliṁ sabhājayanty āryā (Bhāg.-p , XI.5.36)	330	119	120
kalinā duṣṭasarpeṇa (Kūrma-p., *)	334	122	121
kaler durvisahaḥ krodhas (Bhāg.-p., XI.21.20)	457	161	135
kaler doṣanidher rājan (Bhāg.-p., XII.3.51)	342	121	121
kalau na rājan (Bhāg.-p., XII.3.45)	354	124	122
kalau nāmaiva nāmaiva (Vaiṣṇavānandalahari, 70)	350	123	122
kalpāyuṣām sthānajayāt (Bhāg -p., V.19.21)	471	166	137
kas tṛpnuyāt tīrtha- (Bhāg.-p., III.5.11)	98	39	92

Marfat.com

First Words	Śloka Number	Text Page	Résumé Page
kāmaṁ krodhaṁ bhayam (Bhāg.-p., X.29.15)	59	26	87
kāmaṁ bhavaḥ svavṛjinair (Bhāg,-p., III.15,49)	313	113	118
kāmādiguṇasaṁyuktā (Vaiṣṇavānandalahari, 29)	47	19	86
kāmair āhatadhīr dāntaḥ (Bhāg.-p,, XI.11.30)	39	17	85
kāverī ca mahāpuṇyā (Bhāg.-p., XI.5.40)	335	120	120
kiṁ janmabhis tribhir (Bhāg.-p., IV.31.10)	423	149	131
kiṁ duṣkarair naḥ (Bhāg.-p., V.19.21)	470	165	137
kiṁ punar brāhmaṇā puṇyā (Bhagavadgītā, 9.33)	294	107	115
kiṁ pramattasya bahubhiḥ (Bhāg.-p., II.1.12)	419	147	130
kiṁ varṇitena bahunā (Bhāg.-p., XI.19.45)	568	198	149
kiṁ vā yogena sāṁkhyena (Bhāg.-p., IV.31.12)	424	149	131
kiṁ anyair asadālāpaiḥ (Bhāg.-p., I.16.7)	441	154	133
kurvanti vaiṣṇavāḥ (Vaiṣṇavānandalahari, 13)	45	19	86
kṛtādiṣu prajā rājan (Bhāg.-p., XI.5.38)	333	119	120
kṛte kaliyugaṁ tasya (Brahmāṇḍa-p , *)	346	122	121
kṛte pāpe'nutapo vai (Viṣṇu-p., II.6.36)	166	63	100
kṛte yad dhyāyato viṣṇum (Bhāg.-p., XII.3.52)	343	121	121
kṛpālur akṛtadrohaḥ (Bhāg.-p., XI.11.29)	38	17	85
kṛṣṇam enam avaihi (Bhāg.-p., X.14.55)	60	26	87
kṛṣṇavarṇaṁ tviṣākṛṣṇam (Bhāg.-p., XI.5.31)	327A	118	119
kṛṣṇe svadhāmpopagate (Bhāg.-p., I.3.43)	542	191	145
kecit kevalayā bhaktyā (Bhāg.-p., VI.1.5)	219	80	107
kevalena hi bhāvenā (Bhāg.-p., XI.12.8)	248	90	110
kaivalyaṁ sāttvikaṁ jñānam (Bhāg.-p., XI.25.24)	250	92	111
kvacit kvacin mahābhāga (Bhāg.-p., XI 5.39)	334	120	120
kvacid rudanty acyutacintayā (Bhāg.-p., XI.3 32)	246	90	110
kvacin nivartate'bhadrāt (Bhāg.-p., VI.1.10)	453	159	134
kvāhaṁ buddhyādisaṁruddhaḥ (Bhāg.-bhāvārtha-dīpikā, X.87.24)	201	75	105
kṣaṇārdhenāpi tulaye na (Bhāg.-p., IV.24.57)	24	12	84
kṣipraṁ bhavati dharmātmā (Bhagavadgītā, 9.31)	292	106	115
kṣuttṛttridhātubhir (Bhāg.-p., III.9.8)	366	128	124

Marfat.com

First Words	Śloka Number	Text Page	Réssumé Page
kṣutparīto yathā dīnaḥ (Bhāg.-p., IV 29.30)	503	178	141
kṣetrānāmapi sarveṣām (Bhāg.-p., XII.13.17)	555	194	147
khadyotaḥ śobhate tāvat (Some purāṇa)	547	192	146
khadyotāni kukāvyāni (Some purāṇa)	548	192	146
gāyanti devāḥ kila (Viṣṇu-p., II.3.24)	475	167	137
gāyanti vaiṣṇavāḥ sarve (Vaiṣṇavānandalahari, 11)	44	18	86
guṇākṛtam urusaṁsaraṇa- (Bhāg.-bhāvārtha-dīpikā, XI.25.35)	258	94	111
guṇādhikān mudaṁ lipsed (Bhāg.-p., IV.8.34)	281	101	114
gṛhītvāpīndriyair arthān (Bhāg.-p., XI.2.48)	260	96	111
grantho'ṣṭādaśasahasro (Some purāṇa)	545	192	146
caraṇasmaraṇaṁ premṇā (Bhāg.-bhāvārtha-dīpikā, X.87.23)	161	62	100
jano'budho'yaṁ nijakarma- (Bhāg.-p., VIII.24.27)	196	73	104
janmedaṁ vyarthatāṁ nītam (Śāntiśataka, 1.12)	500	175	140
jātaśraddho matkathāsu (Bhāg.-p., XI.20.27)	481	169	138
jānīma naitat kva vayam (Viṣṇu-p., II.2.26)	476	167	137
jihvā na vakti (Bhāg.-p., VI.3.29)	390	135	127
jīvanaṁ viṣṇubhaktasya (Viṣṇu-p., *)	418	146	130
jīvan śavo bhāgavatāṅghrireṇum (Bhāg.-p., II.3.23)	449	158	134
jñāto'si me'dya sucirān (Bhāg.-p., III.9.1)	48	20	86
jñātvājñātva ca ye vai (Bhāg.-p., XI.11.33)	42	18	85
jñāne prayāsaṁ udapāsya (Bhāg.-p., X.14.3)	197	74	104
taṁ tvakhilātmadayiteśvaram (Bhāg.-p., XI.29.5)	65	27	88
taṁ durārādhyam ārādhya (Bhāg.-p., IV.24.55)	188	71	103
taj janma tāni karmāṇi (Bhāg.-p., IV.31.9)	431	145	130
tato duḥsaṅgam utsṛjya (Bhāg.-p , XI.26.26)	37	16	85
tato'nyathā kiñcana yad (Bhāg.-p., I.5.14)	430	151	132
tato bhajeta mām prītyā (Bhāg.-p.,XI.20.28)	482	169	138
tat karma haritoṣaṁ yat (Bhāg.-p., IV.29.49)	412	145	129
tat karma yan na bandhāya (Viṣṇu-p., I.19.41)	414	145	130
tatra kīrtayato viprā (Bhāg.-p., *)	539	191	145

Marfat.com

First Words	Śloka Number	Text Page	Résumé Page
tat sarvaṁ bhaktiyogena (Bhāg.-p., XI.20.33)	487	171	138
tathā na te mādhava (Bhāg.-p., X.2.33)	83	33	90
tathāpare cātmasamādhiyoga- (Bhāg.-p., III.5.46	118	46	94
tadaśmasāraṁ hṛdayam (Bhāg -p., III.3.24)	450	158	134
tadā rajas tamo bhāvaḥ (Bhāg.-p., I.2.19)	90	37	91
tad eva ramyaṁ ruciram (Bhāg.-p., XII.12 51)	443	155	133
tad vā idaṁ bhuvanamaṅgala- (Bhāg.-p., III.9.4)	51	22	86
tad vāgvisargo janatāghaviplavo (Bhāg.-p., I 5.11)	421	147	131
tan naḥ prabho tvam (Bhāg.-p., V.19.15)	527A	185	144
tan naḥ samādiśopāyam (Bhāg.-p., X.73.15)	321	115	119
tapantu tāpaiḥ prapatantu (Bhāg.-bhāvārtha-dīpikā, X.87.27)	427	150	131
tam eva mṛtyum amṛtam (Bhāg.-p., IV.11.27)	68	28	88
tam evātmānam ātmastham (Bhāg.-p., IV.24.70)	189	71	103
tayā ca rahitaḥ sādho (Bhāg.-p., XI.21.21)	458	161	135
taravaḥ kiṁ na jīvanti (Bhāg.-p., II.3.18)	369	129	124
tava kathāmṛtaṁ taptajīvanam (Bhāg.-p., X.31.9)	108	43	93
tasmāt tvam sarvabhāvena (Bhāg.-p., III.32.22)	187	70	103
tasmāt tvam uddhavotsṛjya (Bhāg.-p., XI.12.14)	239	87	109
tasmāt sarvātmanā rājan hariḥ (Bhāg.-p., II.2.36)	185	70	103
tasmāt sarvātmanā rājan hṛdistham (Bhāg.-p., XII.3.49)	340	121	121
tasmāt saṁkīrtanam viṣṇor (Bhāg.-p., VI.3.31)	144	55	98
tasmād asadabhidhanām (Bhāg.-p., XI.14.28)	163	62	100
tasmād ekena manasā (Bhāg.-p., I.2.14)	212	75	106
tasmād guruṁ prapadyeta (Bhāg.-p., XI.3.21)	7	5	81
tasmād deham imam labdhvā (Bhāg.-p., XI.25.33)	237	86	109
tasmān madbhaktiyuktasya (Bhāg.-p., XI.20.31)	485	170	138
tasmin mahanmukharitā (Bhāg.-p., IV.29.40)	510	179	141
tasya viṣṇoḥ prasādena (Some purāṇa)	518	181	142
tasyādya te dadṛśimaṅghrim (Bhāg.-p , X.84.26)	322	115	119
tān vā asadvṛttibhir (Bhāg.-p., III.5.44)	116	45	94

Marfat.com

First Words	*Śloka Number*	*Text Page*	*Résumé Page*
tān ahaṁ dviṣataḥ krūrān (Bhagavadgītā, 16.19)	391	136	127
tān ānayadhvam asato (Bhāg.-p., VI.3.28)	389	135	126
tān śocyāśocyān avido'nuśoce (Bhāg.-p., III.5.14)	371	130	124
tāvat pramodate svarge (Bhāg.-p., XI.10.26)	467	164	136
tāvad rāgādayās stenās (Bhāg.-p., X.14.36)	290	105	115
titikṣā duḥkhasaṁmarṣo (Bhāg.-p., XI.19.36-37)	560	195	148
tiraskṛtā vipralabdhāḥ (Bhāg.-p., I.18.48)	277	100	113
tiṣṭhanti mama nāmāni (Vaiṣṇavānandalahari, 83)	435	152	132
tīrthaṁ cakre nṛponam (Bhāg.-p., X.90.47)	150	57	98
tulayāma lavenāpi na svargam (Bhāg.-p., I.18.13)	20	11	83
tulasīdalamātreṇa (Naraniṁha-p., 8.23)	170	65	101
te'pi pūjyās te'pi dhanyās (Matsya-p., *)	347	122	121
te vai vidanty atitaranti (Bhāg.-p., II.7.46)	520	182	142
teṣāṁ durāpaṁ kiṁ vā (Bhāg.-p., IV.23.27)	16	9	83
teṣāṁ vicaratām padbhyām (Bhāg.-p., IV.30.37)	114	44	94
tais tāny aghāni pūyante (Bhāg.-p., VI.2.17)	455	160	135
tyaktvā sudustyajasurepsita- (Bhāg.-p., XI.5.34)	329	119	120
tyaktvā svadharmaṁ caraṇāmbujam (Bhāg.-p., I.5.17)	286	103	114
tribhuvanakamanaṁ tamālavarṇam (Bhāg.-p., I.9.33)	309	111	117
tribhuvanavibhavahetave (Bhāg.-p., XI.2.53)	265	96	112
tvaṁ bhāvayogaparibhāvita- (Bhāg.-p., III.9.11)	186	70	103
tvaṁ sarvalokasya suhṛt (Bhāg.-p., VIII.24.52)	70	29	88
tvatkathāmṛtapāthodhau (Bhāg.-bhāvārtha-dipīkā, X.87.21)	221	81	107
tvadaṁśasya mameśāna (Bhāg.-bhāvārtha-dipīkā, XI.87.20)	325	117	119
tvan nityamuktapariśuddha- (Bhāg.-p., IV.9.15)	357	125	123
tvanmāyayāddhā jana iśa (Bhāg.-p., IV.20.31)	525	184	143
tvam eka evāsya sataḥ (Bhāg.-p., X.2.28)	78	31	89
tvām ātmānaṁ paraṁ matvā (Bhāg.-p., X.14.27)	55	24	87

Marfat.com

First Words	*Śloka Number*	*Text Page*	*Résumé Page*
tvayi me'nanyaviṣayā (Bhāg.-p., I.8.42)	238	87	109
tvayy ambujākṣākhila- (Bhāg.-p., X.2.30)	80	32	89
daridro yas tv asantuṣṭaḥ (Bhāg.-p., XI.19.44)	567	198	149
duḥkheṣv ekatareṇāpi (Bhag.-p., IV.29.32)	504	178	141
durācāro'pi duḥśīlaḥ (Padma-p., Svarga-kh. 15.1.48)	308	110	117
durāpa hy alpatapasaḥ (Bhāg.-p., III.7.23)	21	11	83
durvṛtto vā suvṛtto vā (Bṛhannāradiya-p., *)	307	110	117
dṛṣṭaśrutābhyāṁ yat pāpam (Bhāg.-p., VI.1.9)	452	159	134
devarṣibhūtāptanṛṇām (Bhāg.-p., XI.5.41)	304	109	116
devānāṁ guṇaliṅgānām (Bhāg.-p.,III.25,32)	213	79	106
dehendriyaprāṇamanodhiyām (Bhāg.-p., XI.2.49)	261	95	111
daivī hy eṣā guṇamayī (Bhagavadgītā, 7.14)	528	186	144
daivena te hatadhiyo (Bhāg.-p., III.9.7)	365	128	123
dravyaiḥ prasiddhair (Bhāg -p., XI.27.15)	175	67	101
dviṣantaḥ parakāyeṣu (Bhāg.-p., XI.5.15)	379	132	125
dharmaḥ projjhitakaitavo'tra (Bhāg.-p., I.1.2)	530	187	144
dharmaḥ svanuṣṭhitaḥ puṁsām (Bhāg.-p., I.2.8)	429	151	131
dharma iṣṭadhanaṁ nṛṇām (Bhāg.-p., XI.19.39)	562	196	148
dhig janma naḥ trivṛd- (Bhāg.-p., X.23.40)	425	149	131
dhautātmā puruṣaḥ kṛṣṇa- (Bhāg.-p , II.8.6)	95	38	91
dhyāyan kṛte yajan yajñaiḥ (Bhāg.-bhāvartha-dīpikā, XI.5.36 ; citing Padma-p, Uttara-kh., 71.25)	331	119	120
dhyeyaṁ sadā paribhavaghnam (Bhāg.-p., XI.5.33)	328	118	119
na kāmakarmabījānām (Bhāg -p., X1.2.50)	262	96	111
na kāmaye nātha tad apy aham (Bhāg.-p., IV.20.24)	102	40	92
na hiñcit kurute karma (Yogasāra, *)	361	126	123
na kiñcit sādhavo dhīrā (Bhāg.-p., X.20,34)	488	171	139
na caivaṁ vismayaḥ kāryo (Bhāg.-p., X.29.16)	62	26	87
na tathā me priyatama (Bhāg.-p., XI.14,15)	270	98	112

Marfat.com

First Words	*Śloka Number*	*Text Page*	*Resumé Page*
na tathā hy aghavān rājan (Bhāg.-p., VI.1.16)	297	107	116
na dānaṁ na tapo nejyā (Bhāg.-p., VII.7.52)	192	71	104
na nākapṛṣṭhaṁ na ca (Bhāg.-p., XI.14.14)	269	98	112
nanvarthakovidā brahman (Bhāg.-p., X.80.33)	5	4	81
na bhajati kumanīṣiṇām (Bhāg.-p., IV.31.21)	403	140	128
na mayyaikāntabhaktānām (Bhāg.-p., XI.20.36)	490	171	139
namo'stu te mahāyogin (Bhāg.-p., XI.29.40)	326	117	119
na yatprasādāyutabhāgaleśam (Bhāg.-p., VIII.24.49)	69	29	88
na yatra vaikuṇṭhakathā- (Bhāg.-p., V.19.23)	472	166	137
na yad vacas citrapadam (Bhāg.-p., XII.12.51)	444	155	133
na yad vacas citrapadam (Bhāg.-p., I.5.10)	440	154	133
na yasya janmakarmābhyām (Bhāg.-p., XI.2.51)	263	96	112
na yasya svaḥ para iti (Bhāg.-p., XI.2.52)	264	96	112
narakas tama unnāho (Bhāg.-p., XI.19.43)	566	197	149
naravapuḥ pratipadya yadi tvayi (Bhāg.-bhāvārtha-dīpikā, X.87.17)	374	131	125
narasiṁha hṛṣikeśaḥ (Narasiṁha-p., 8.22)	168	64	100
na rodhayati māṁ yogo (Bhāg.-p., XI.12.1)	33	15	84
na vai jano jātu kathañcana (Bhāg.-p., I.5.19)	287	104	115
na śūdrā bhagavadbhaktās	398B	138	127
na śṛṇoti harer yastu (Bṛhannāradīya-p., *)	388	135	126
naṣṭaprāyeṣv abhadreṣu (Bhāg.-p., I.2.18)	89	36	91
na saṁdveṣṭi kaliṁ samrāṭ (Bhāg.-p., I.18.7)	352	123	122
na hy aṅgopakrame dhvaṁso (Bhāg.-p., XI.29.20)	232	84	108
na hy ataḥ paramo lābho (Bhāg.-p., XI.5.37)	332	119	120
na hy ato'nyaḥ śivaḥ panthā (Bhāg.-p., II.2.33)	183	70	103
na hy abdhutam tvaccaraṇābja- (Bhāg.-p., V.13.22)	26	13	84
na hy apmayāni tīrthāni (Bhāg.-p., X.48.31)	21	13	84
nātaḥ paraṁ karmanibandhakṛntanam (Bhāg.-p., VI.2.46)	146	56	98
nātaḥ paraṁ parama yad bhavataḥ (Bhāg.-p., III.9.3)	50	21	86

Marfat.com

First Words	Śloka Number	Text Page	Résumé Page
nāthe śripuruṣottame (Śāntiśataka, 1.11)	445	156	133
nānyan tataḥ padmapalāśalocanād (Bhāg.-p., IV.8.23)	67	28	88
nāmāny anantasya hatatrapaḥ (Bhāg.-p., I.6.27)	209	77	106
nāmoccāraṇamāhātmyam (Bhāg.-p. VI.3.23)	141	53	97
nāmaikam yasya vāci (Padma-p., Svarga-kh., 48.56)	167	63	100
nāyaṁ sukhāpo bhagavān (Bhāg.-p., X.9.21)	115	45	94
nārāyaṇa jagannātha Vāsudeva (Some purāṇa)	43	18	85
nālam dvijatvaṁ devatvam (Bhāg.-p., VII.7.51)	191	71	104
nāham ijyāprajātibhyām (Bhāg.-p., X.80.34)	6	4	81
nigamakalpataror galitam (Bhāg.-p., I.1.3)	531	188	144
nijam aiśvaryam āścaryam (Bhagavadgītā-subodhinī 9.34)	295	107	116
nityārtidena vittena (Bhāg.-p., XI 3.19)	495	174	140
nimnagānāṁ yathā gaṅgā (Bhāg.-p. XII.13.16)	554	194	147
nirapekṣaṁ muniṁ śāntam (Bhāg.-p., XI.14.16)	271	98	112
nirviṇṇānāṁ jñānayogo (Bhāg.-p., XI.20.7-8)	480	170	138
nirvṛttatarṣair upagīyamānād (Bhāg.-p., X.1.4)	106	42	93
niṣkiñcana mayyanurakta- (Bhāg.-p., XI.14.17)	272	98	112
nūnaṁ daivena nihatā (Bhāg.-p., III.32.19)	373	130	125
nṛtyantī tava vīkṣaṇāṅganagatā (Bhāg.-bhāvārtha-dipikā, X.87.38)	524	184	143
nṛdeham ādyam sulabham (Bhāg.-p., XI.20.17)	9	6	62
nṛṇām niḥśreyasārthāya (Bhāg.-p., X.29.14)	58	25	87
naikātmatāṁ me spṛhayanti (Bhāg.-p., III.25.34)	215	79	107
nairapekṣaṁ paraṁ prāhur (Bhāg -p., XI.20.35)	489	171	139
naivaṁvidhaḥ puruṣakāra (Bhāg.-p., V.1.35)	133	51	96
naiṣkarmyam apy acyuta- (Bhāg.-p., I.5.12)	431	151	132
patraṁ puspaṁ phalaṁ toyaṁ (Bhagavadgītā, 9.26)	178	67	102
pathyaṁ pūtamanāyastam (Bhāg.-p., XI.25.28)	254	93	111
payaḥpatrādimātreṇa (Śrīdhara-svāmin, *)	169	65	101

Marfat.com

First Words	*Śloka Number*	*Text Page*	*Résumé Page*
paramātmā nirākāro (Yogasāra, *)	359	126	123
pariniṣṭhito'pi nairguṇye (Bhāg.-p., II.1.9)	541	191	145
paśūn avidhinālabhya (Bhāg.-p., XI.1028)	468	164	136
pādau hareḥ kṣetrapathānusarpaṇe (Bhāg.-p., IX.4.20)	408	142	[illegible]
pānena te deva (Bhāg.-p., III.5.45)	117	45	94
pāpacyamānena hṛdāturendriyaḥ (Bhāg.-p., IV.3.21)	402	139	128
pārijāte'ñjasā labhye (Bhāg.-p., IV.30.32)	110	44	93
pivanti ye bhagavata ātmanaḥ (Bhāg.-p., II.2.37)	104	41	92
puṁsām kalikṛtadoṣān (Bhāg.-p., XII.3.45)	336A	120	120
prajāpatipatiḥ sākṣād (Bhāg.-p., IV.29.42)	512	180	142
pravibhajy aitan (Yogasāra, *)	362	127	123
praviṣṭaḥ karṇarandhreṇa (Bhāg.-p., II.8.5)	94	38	91
prāptā nṛjātin tv iha (Bhāg.-p., V.19.24)	15	8	82
prāyaśaḥ sādhavo loke (Bhāg.-p., I.18.50)	278	100	113
prāyaścittāni cīrṇāni (Bhāg.-p., VI.1.18)	451	159	134
prāyeṇa veda tad idam (Bhāg.-p., VI.3.25)	143	54	97
prāyo bhaktā bhagavati (Bhāg.-p., XI.5.41)	336	120	120
proktena bhaktiyogena (Bhāg.-p., XI.20.29)	483	170	138
prauṣṭhapadyām paurṇamāsyām (Bhāg.-p., XII.13.13)	551	193	146
phalaśrutir iyam (Bhāg.-p., XI.21.23)	460	162	136
brahmahā pitṛhā goghno (Bhāg.-p., VI.13.8)	148	56	98
bādhyamāno'pi madbhakto (Bhāg.-p., XI.14.18)	284	103	114
brahmādi trṇaparayantam (Some purāṇa)	517	181	142
brāhmaṇe pukkaśe stene (Bhāg.-p., XI.29.14)	227	83	108
bhaktiṁ muhuḥ pravahatām (Bhāg.-p., IV.9.11)	23	12	83
bhaktiḥ pareśānubhavo (Bhāg.-p., XI.2.42)	244	89	110
bhaktiyogena manasi (Bhāg.-p., I.7.4.)	533	189	145
bhaktyāham ekayā grāhyaḥ (Bhāg.-p., XI.14.21)	296	107	116

Marfat.com

First Words	Śloka Number	Text Page	Résumé Page
bhagavata uruvikramāṅghri-(Bhāg.-p., XI 2.54)	266	97	112
bhagavati ca harāv ananyacetā (Narasiṁha-p., 9.5)	302	108	116
bhagavati vimukhasya (Narasiṁha-p., 9.4)	433	152	132
bhagavān brahmā kārtsnyena (Bhāg.-p., II.2.34)	184	70	103
bhago ma aiśvaro (Bhāg.-p., XI 19.40)	563	196	148
bhayaṁ dvitīyābhiniveśataḥ (Bhāg.-p., XI.2.37)	180	68	102
bhayaṃ pramattasya vaneṣvapi (Bhāg.-p., V.1,17)	274	99	113
bhavadvidhā bhāgavatāḥ sannisevyā (Bhāg.-p., X.48 30)	29	14	84
bhavadvidhā bhāgavatā (Bhāg.-p., I.13.10)	276	100	113
bhavāpavargo bhramato (Bhāg.-p.. X.51.53)	27	13	84
bhāraḥ paraṃ paṭṭakirīṭa-(Bhāg.-p., II.3.21)	447	157	134
bhikṣāśayā na gṛhṇati (Vaiṣṇavānandalahari, 96)	395	137	127
bhidyate hṛdayagranthiḥ (Bhāg.-p., I.2.29)	92	37	91
bhidyate hṛdayagranthiḥ (Bhāg.-p., XI.20.30)	484	170	138
bhrātṛvyam enam (Bhāg.-p., V.11 17)	8	5	81
majjanmakarmakathanam (Bhāg.-p., XI.11.36)	204	76	105
majjanmanaḥ phalam idam (Some purāṇa)	317	114	118
matkathāśravaṇe śraddhā (Bhāg.-p., XI.11.35)	203	75	105
madarpanaṃ niṣphalaṃ vā (Bhāg.-p., XI.25.23)	257	93	111
madguṇaśrutimātreṇa (Bhāg.-p., III.29.11)	235	86	109
manaso vṛttayo naḥ syuḥ (Bhāg.-p., X.47.66)	319	115	118
mandasya mandaprajñasya (Bhāg.-p., I.16.20)	368	129	124
manye kutaścid bhayam (Bhāg.-p., XI.2.33)	179	68	102
mamārcāsthāpane śraddhā (Bhāg.-p , XI.11.38)	206	76	105
mamottamaślokajaneṣu (Bhāg -p., VI.11.27)	316	114	118
mayy arpitātmanaḥ sakhya (Bhāg.-p.,XI.14,12.)	222	81	107
marīcyatryaṅgirasau (Bhāg.-p., IV.19.43)	513	180	142
martyas tayā nanu samedhitayā (Bhāg.-p., X.90.50)	198	74	104

Marfat.com

First Words	*Śloka Number*	*Text Page*	*Résumé Page*
mallakṣaṇam imaṁ kāyam (Bhāg.-p., XI.26.1)	11	7	82
malliṅgamadbhakta-(Bhāg.-p., XI.11.34)	202	75	105
māṁ hi pārtha vyapāśritya (Bhagavadgītā, 9.32)	293	106	115
mām ekam eva śaraṇam (Bhāg.-p., XI 12.15)	240	87	109
mām eva sarvabhūteṣu (Bhāg.-p., XI.29.12)	225	83	108
mithyātarkakutarka- (Bhāg.-bhāvārtha-dīpikā, X.87.25)	155	59	99
mukundaliṅgālayadarśane (Bhāg.-p., IX.4.19)	407	142	129
mukhe mandahāsam (Bhujaṁga-prayāta,*)	76	30	89
mūrkho dehādyahaṁbuddhiḥ (Bhāg.-p., XI.19.42)	565	197	149
mṛṣā giras tāhy asatīr (Bhāg.-p., XII.12.49)	442	155	133
moghāśā moghakarmāṇo (Bhagavadgītā 9.12)	394	136	127
mriyamāṇair abhidhyeyo (Bhāg.-p., XII.3.50)	341	121	121
mriyamāṇo harer nāma (Bhāg.-p., VI.2.49)	147	56	98
ya eṣaṁ puruṣam sākṣāt (Bhāg.-p., XI.5.3)	375	131	125
yaḥ kaścid api dharmātmā (*)	439	153	133
yaḥ prākṛtair jñānapathair (Bhāg.-p., VI.4.34)	86	35	90
yaḥ prāpya mānuṣaṁ deham (Bhāg.-p., XI.7.74)	14	8	82
yacchraddhayā śrutavatyā ca (Bhāg.-p., III.5.41)	119	46	94
yat karmabhir yat tapasā (Bhāg -p., XI.20.32)	486	170	138
yatpādapaṅkajapalāśavilāsa-(Bhāg.-p., IV.22.39)	160	61	99
yat pādayor aśaṭhadhīḥ (Bhāg.-p., VIII.22.23)	176	67	101
yatra nārāyanaḥ sākṣān (Bhāg.-p., IV.30.36)	113	44	94
yatra bhāgavatā rājan (Bhāg.-p., IV.29.39)	509	179	141
yatrādhikṛtya gāyatrīm (Matsya-p., 53.20)	543	191	146
yatrēḍyante kathāmṛṣṭās (Bhāg.-p., IV.30.35)	112	44	94
yat śṛṇvato'paityaratir (Bhāg.-p., X.7.2)	107	42	93
yat sarvatīrthaprabhavam (*)	85	34	90
yat sevayāgner iva (Bhāg.-p., VIII.24.48)	195	73	104

Marfat.com

First Words	Śloka Number	Text Page	Résumé Page
yathāgniḥ susamiddhārciḥ (Bhāg.-p., XI.14.19)	285	103	114
yathā taror mūlaniṣecanena (Bhāg.-p., IV.31.14)	173	66	101
yathā hastipade sarvam (Bṛhannāradīya–p., 32.41)	72	29	89
yathā hi puruṣo bhāram (Bhāg.-p., IV.29.33)	505	178	141
yathā hi skandhaśākhānām (Bhāg.-p., VIII.5.49)	174	66	101
yathā hemni gato vahnir (Bhāg.-p., XII.3.47)	338	120	120
yathopāśrayamāṇasya bhagavantam (Bhāg.-p., XI.2631)	30	14	84
yad arcitaṁ brahmabhavādibhiḥ (Bhāg.-p., X.38.8)	84	38	90
yadā yasyānugṛhṇati (Bhāg.-p., IV.29.46)	516	181	142
yad yatra naḥ svarga-(Bhāg.-p., V.19.27)	473	167	137
yan na vrajanty aghabhido (Bhāg.-p., III.15.22)	372	130	124
yannāma gṛhṇann akhilān (Bhāg.-p., X.34.17)	149	56	98
yannāmadheyaṁ mriyamāṇa (Bhāg.-p., XII.3.44)	353	123	122
yannāmadheyaśravaṇānukīrtanāt (Bhag.-p., III.33.6)	130	50	96
yannāmadheyena bhavābdhim añjasā (Śaṅkaradeva)	1	1	81
yannāma śrutam anukīrtayed (Bhāg.-p., V.25.11)	132	50	96
yamādibhir yogapathaiḥ (Bhāg -p., I.6.36)	288	104	115
yayā saṁmohito jiva (Bhāg.-p., I.7.5)	534	190	145
yarhi vāva mahimni (Bhāg.-p., II.9.3)	523	183	143
yarhy abjanābhacaraṇaiḥ (Bhāg.-p., XI.3.40)	223	81	107
yaścātmānaṁ nibadhnāti (Some purāṇa)	397	137	127
yaśaḥ śriyām eva pariśramo (Bhāg.-p., XII.12.54)	164	62	100
yasya bhaktir bhagavati (Bhāg.-p., VI.12.22)	190	71	103
yasyākhilāmīvahabhiḥ (Bhāg.-p., X.36.12)	422	148	131
yasyātmabuddhiḥ kunape (Bhāg.-p., X.84.13)	384	134	126
yasyāvatāraguṇakarmaviḍambanāni (Bhāg.-p., III.9.15)	129	49	96
yasyāṁ vai śrūyamāṇāyām (Bhāg.-p., I.7.7)	536	190	135
yā tasya te pādasaroruhārhaṇam (Bhāg.-p., V.18.21)	172	66	101

Marfat.com

First Words	*Śloka Number*	*Text Page*	*Résumé Page*
yātrā balividhānañca (Bhāg.-p., XI.11.37)	205	76	105
yā nirvṛtis tanubhṛtām (Bhāg.-p., IV.9.10)	101	40	92
yā yā kathā bhagavataḥ (Bhāg.-p. I.18.10)	97	39	91
yāvat te māyayā spṛṣṭā (Bhāg.-p., IV.30.33)	111	44	91
yāvat sarveṣu bhūteṣu (Bhāg.-p., XI.29.17)	229	84	108
yudhi turagarajovidhūmra-(Bhāg.-p., I.9.34)	310	111	117
ye kaivalyam asaṁprāptāḥ (Bhāg.-p., XI.5.16)	380	132	125
ye tu tvadīyacaraṇāmbuja-(Bhāg.-p., III.9.5)	100	39	92
ye tv anevaṁvido'śāntāḥ (Bhāg.-p., XI.5.14)	378	132	125
ye'nye'ravindākṣa (Bhāg.-p., X.2.32)	82	33	90
ye'bhyarthitām api ca no (Bhāg.-p., III.15.24)	12	7	62
yeṣām sa eva bhagavān (Bhāg.-p., II.7.42)	519	182	142
yeṣām saṁsmaraṇād eva (Bhāg.-p., *)	36	15	85
yair na śrutam bhāgavatam (Some purāṇa)	434	152	132
yo dustyajān dārān sutān (Bhāg.-p., V.14.43)	273	99	113
yo me bhaktajanālāpī (Vaiṣṇavānandalahari, 28)	46	19	86
yo me bhaktasya nindārthī (Vaiṣṇavānandalahari, 15)	405	141	128
yo yo mayi pare dharmaḥ (Bhāg.-p., XI.29.21)	233	85	108
yo vai vāṅmanasī (Bhāg.-p., XI 16.43)	432	152	132
rājante tāvad anyāni (Bhāg.-p., XII.13.14)	552	193	146
rājan patir gurur ayam (Bhāg.-p., V.6.18)	220	31	107
rājasā ghorasaṁkalpāḥ (Bhāg.-p., XI.5.7)	400	139	128
rāmeti varṇadvayam ādarena (Viṣṇudharmottara,*)	345	122	122
rūpam tavaitat (Bhāg -p., VIII.6.9)	52	22	86
rūpam yad etad (Bhāg.-p., III.9.2)	49	21	86
lapann acyutānanta (Bhujaṁgaprayāta, 14)	156,327	59,117	99,119
labdhvā jano durlabham (Bhāg.-p., X.51.46)	13	8	82
labdhvā sudurlabham (Bhāg.-p., IX.9.29)	9A	6	82
labdhveha mānuṣīṁ yonim (Bhāg.-p., VI.16.58)	19	10	83
likhitvā tac ca yo (Matsya-p., 53.22)	544	192	146

Marfat.com

First Words	*Śloka Number*	*Text Page*	*Résumé Page*
lokānāṁ lokapālānām (Bhāg.-p., XI.10.30)	446	174	140
vadanti viśvaṁ kavayaś ca (Bhāg.-p., V.18.4)	527	185	143
vanaṁ tu sāttviko vāsaḥ (Bhāg -p., XI.25.25)	251	92	111
varhāyite te nayane (Bhāg.-p. II.3.32)	448	153	134
vastuto jānatām evam (Bhāg.-p., X.14.56)	61	26	87
vāggadgāda dravate (Bhāg.-p., XI.14.24)	247	90	110
vācyamānānāṁ tu ye śāstraṁ (Bṛhānnāradīya-p., *)	387	135	126
vāṇī guṇānukathane (Bhāg.-p., X.10.38)	318	114	118
vāsudeve bhagavati (Bhāg.-p., IV.29.37)	507	179	141
vidyātapaḥprāṇanirodha-(Bhāg.-p.,XII.3.48)	339	121	121
vipadaḥ santu tāḥ (Bhāg.-p., I.8.25)	323	116	119
viprād dviṣaḍguṇayutād (Bhāg.-p., VII.9.10)	384A	134	126
vipro rājanyo vaiśyo vā (Bhāg.-p., XI.5.5)	376	131	125
vibharṣi rupāṇy avabodha ātmā (Bhāg.-p., X.2.29)	79	32	89
vibhvyas tavāmṛtakatho-(Bhāg.-p., XI.6.19)	420	147	130
vile vatorukramavikramāṇi (Bhāg.-p., II.3.20)	446	157	133
viśvasya janmasthiti-(Bhāg.-p., III.5.42)	159	61	99
viṣayān dhyāyataś cittam (Bhāg.-p., XI.14.27)	162	62	100
viṣayābhiniveśena (Bhāg.-p., XI.21.22)	459	162	135
viṣayeṣu guṇādhyāsāt (Bhāg.-p., XI.21.19)	456	161	135
visṛjati hṛdayaṁ na yasya (Bhāg.-p., XI.2.55)	267	97	112
visṛjya sarvān anyāṁśca (Bhāg.-p., III.25.40)	217	80	107
visṛjya smayamānāṁś tān (Bhāg.-p., XI.29.16)	228	84	108
vīryāṇi tasyākhiladehabhājām (Bhāg.-p., X.1.7)	87	36	90
vairāgyam ādyaṁ yatamānasaṁjñam (*,cited in Bhāg.-bhāvārtha-dipikā, X.89.15)	498	175	140
vaireṇa yaṁ nṛpatayaḥ (Bhāg.-p., XI.5.48)	249	91	111
vaiṣṇavāl labhate bhaktim (Vaiṣṇavānandalahari, 17)	351	123	122
vyavahitapṛtanāmukham (Bhāg.-p., I.9.36)	312	112	117
vratāni yajñas chandāṁśi (Bhāg.-p., XI.12.2)	34	15	35

Marfat.com

First Words	*Śloka Number*	*Text Page*	*Résumé Page*
śabdabrahmaṇi duṣpāre (Bhāg.-p., IV 29.45)	515	181	142
śabdabrahmaṇi niṣṇāto (Bhāg.-p., XI 11.18)	383	133	126
śāstreṣv iyān eva viniścito (Bhag.-p.,IV.22 21)	121	47	95
śiras tu tasyobhayaliṅgam ānamet (Bhāg.-p.. X.80.4)	410	143	129
śubham idam upalabhya (Narasiṁha-p., 9.8)	11	9	83
śūdram vā bhagavadbhaktam (*)	398A	138	127
ṣṛṇvantaḥ śraddhayā nityam (Bhāg.-p,, II.8.4)	93	38	91
sṛṇvatām svakathām kṛṣṇaḥ (Bhāg.-p., I.2.17)	88	36	90
śṛṇvanti gāyanti gṛṇanty (Bhāg.-p., I.8.36)	210	78	106
śṛṇvan subhadrāṇi (Bhāg.-p., XI.2.39)	242	89	110
śaucam japas tapo (Bhāg.-p.,. XI.19.34)	558	195	147
śravaṇaṁ kīrtanaṁ dhyānam (Bhāg.-p., XI.3.27)	199	75	105
śravaṇād darśanād vāpi ((Bhāg.-p., XII.10.25)	35	15	85
śriyā vibhūtyābhijanena (Bhāg.-p., XI.5.9)	401	139	128
śrībhāgavataṁ purāṇam (Bhāg.-p , XII.13.18)	556	194	147
śrīmadbhāgavatābhidhaḥ (Bhāg.-bhāvārtha-dīpikā, I.1.1)	529	187	144
śṛīr guṇā nairapekṣādyāḥ (Bhāg.-p., XI.13.41)	564	197	148
śrutañ ca dṛṣṭavad duḥkham (Bhāg.-p., XI.10.21)	462	163	136
śrutaḥ saṁkīrtito dhyātaḥ (Bhāg,-p., XII.3,46)	337	120	120
śrutiḥ pratyakṣam aitihyam ((Bhāg.-p,, XI.19.17)	492	173	139
śrutena tapasā kiṁ vā (Bhāg.-p., IV.31.11)	426	150	131
śreyaḥsṛtim bhaktim (Bhāg.-p, X.14.4)	428	150	131
śvapaco'pi dvijaśreṣṭho (*)	399	138	128
śvapaco'pi mahīpāla (Bṛhannāradīya-p., 32.39)	385	134	126
śvapākam iva vīkṣeta (Padma-p,, Svarga-kh., 15.152)	398	137	127
śvaviḍvarāhoṣṭrakharaiḥ (Bhāg.-p , II.3.19)	370	129	124
sa īśo yadvaśe māyā (Bhāg.-bhāvārtha-dīpikā, I.7.6)	355	125	122
sa uttamaślokamahanmukhacyuto (Bhāg.-p., IV.20.25)	103	41	82

Marfat.com

First Words	Śloka Number	Text Page	Résumé Page
saṁkīrtyamāno bhagavān (Bhāg.-p., XII.12.48)	151	58	98
saṁyaccha roṣaṃ bhadraṁ (Bhāg.-p., IV.11.31)	91	39	92
saṁsārakūpe patitam (Bhāg.-p., XI.8.41)	66	28	88
saṁsārasindhum atidustaram (Bhāg.-p., XII.4.40)	109	43	93
sakṛn manaḥ kṛṣṇapadāravindayoḥ (Bhāg.-p., VI.1.19)	289	104	115
satāṁ prasaṅgān mama (Bhāg.-p., III.25.25)	22	11	83
sa tu saṁśrāvayāmāsa (Bhāg-p., *)	538	190	145
sattve pralīnāḥ svar yānti (Bhāg.-p., XI.25.22)	256	73	111
satyaṃ satyaṁ punaḥ satyam (Bṛhannāradīya-p., 32.9)	71	29	88
satyaṁ satyaṃ punaḥ satyam (Pāṇḍavīgītā, 68)	74	30	89
satyaṃ satyaṁ punaḥ satyam (Vaiṣṇavānandalahari, 53)	157	63	99
satyaṁ vadmi hitaṃ vadmi (Bṛhannāradīya-p., 32.10)	177	67	102
sadā lolā lakṣmīr (Prabodhacandrodaya-nāṭaka, 5.24)	501	175	140
santo diśanti cakṣūṁṣi (Bhāg.-p , XI.26.34)	31	14	84
sapadi sakhivaco niśamya (Bhāg.-p., I.9.35)	311	112	117
samastaśāstrasatsāram (Śaṅkaradeva)	3	3	81
samāśritā ye padapallavaplavam (Bhāg.-p., X.14.58)	64	27	88
samāhṛtya svayogaṃ tu (Bhāg.-bhāvārtha-dīpikā, XI.28.45)	244	83	108
samuddhṛtaṁ bhāgavatābhidhāna-(Śaṅkaradeva)	2	3	81
saṁmārjanopalepābhyam (Bhāg.-p., XI.11.39)	207	76	105
sarvadharmān parityajya (Bhagavadgītā, 18.66)	241	88	109
sarvaṃ brahmātmakaṃ tasya (Bhāg.-p., XI.29.18)	230	84	108
sarvadharmojjhitā viṣṇor (Padma-p., Uttara-kh., 71.99)	153	58	98
sarvato manaso'saṅgam (Bhāg.-p., XI.3.23)	280	101	114
sarvabhūteṣu yaḥ paśyet (Bhāg.-p., XI.2.45)	259	95	111
sarvavedāntasāraṁ hi (Bhāg.-p., XII.13.12)	550	193	146

Marfat.com

First Words	*Śloka Number*	*Text Page*	*Résumé Page*
sarvavedāntasāraṁ hi (Bhāg.-p., XII.13.15)	553	193	147
sarvesām apy aghavatām (Bhāg.-p., VI.2.10)	137	52	97
sarveṣām api bhāvānām (Bhāg.-p., X.14.57)	63	26	83
sa vañcito vatātmadhruk (Bhāg.-p., IV.23.28)	17	9	89
sa vai puṁsāṁ paro dharmaḥ (Bhāg.-p., I.2.6)	416	146	130
sa vai manaḥ kṛṣṇapadāravindayor (Bhāg.-p., IX.4.18)	406	142	129
sa vai satkarmaṇām (Bhāg.-p., X.80.32)	4	4	81
sa saṁhitām bhāgavatīm (Bhāg.-p., I.7.8)	537	190	145
sāṁketyaṁ parihāsyaṁ vā (Bhāg.-p., VI.2.14)	138	52	97
sā jihvā yā hariṁ stauti (Vāmana-p., 94.33 ; Garuḍa-p., Pūrvārdha, 235.3)	411	143	129
sāttvikaḥ kārako'saṅgī (Bhāg'-p., XI.25.26)	252	92	111
sāttvikaṁ sukham ātmottham (Bhāg.-p., XI.25.29)	255	93	111
sāttviky ādhyātmikī śraddhā (Bhāg.-p., XI.25.27)	253	92	111
sālokyasārṣṭisāmīpya-(Bhāg.-p., III.29.13)	218	80	107
sā vāg yayā tasya (Bhāg.-p., X.80 3)	409	143	129
sā śraddhayā bhagavad-(Bhāg.-p., IV.22.22)	122	47	95
sukhaduḥkhamayo māyā-(Yogasāra,*)	363	127	123
so'cirād eva rājarṣe (Bhāg.-p., IV.29.38)	508	179	141
so'haṁ priyasya suhṛdaḥ (Bhāg.-p., VII.9.18)	521	182	143
stenaḥ surāpo mitradhrug (Bhāg.-p., VI.2.9)	136	52	97
strībhiḥ kāmagayānena (Bhāg.-p., XI.10.25)	466	164	136
smarantaḥ smārayantaś ca (Bhāg.-p., XI.3.31)	245	90	110
smartavyaḥ satataṁ viṣṇor (Padma-p., Uttara-kh., 71.100)	154	59	99
svapādamūlaṁ bhajataḥ (Bhāg.-p., XI.5.82)	305	109	116
svapuṇyopacite śubhre (Bhāg.-p., XI.10.24)	465	164	136
svapne'pi mama nāmāni (Vaiṣṇavānandalahari, 97)	396	137	127
svabhāvavijayaḥ śauryam (Bhāg.-p., XI.19.37-38)	561	196	148
svayaṁ samuttīrya sudustaram (Bhāg.-p., X.2.31)	81	32	90
svargino'py etad icchanti (Bhāg.-p., XI.20.12)	10	7	82

Marfat.com

First Words	Śloka Number	Text Page	Résumé Page
haribhaktivihīnā ye (Bṛhannāradīya-p., 4.28)	386	134	126
harer nāmaiva nāmaiva (Bṛhannāradīya-p., 38.126)	349	122	122
harer muhus tatparakarṇapūra-(Bhāg.-p., IV.22.25)	125	48	96
hitvā hy āyāsaracitā (Bhāg.-p., XI.5.18)	382	133	125
hṛdistho'py atidūrasthaḥ (Bhāg.-p., X.86.47)	193	72	104
hlādinyā saṁvidāśliṣṭaḥ (Bhāg.-bhāvārtha-dipīkā, I.7.6)	356	125	122

Marfat.com

भक्तिरत्नाकरः

॥ १ ॥ भक्तिज्ञानप्रदगुरोः पूज्यत्वम् ॥

श्रीकृष्णः शरणम् ॥

यन्नामधेयेन भवाब्धिमञ्जसा तर्या समुत्तीर्य नरः परं पदम् ।
प्राप्नोति पातक्यपि तं सनातनं सदा सदानन्दमुपास्महे हृदि ॥ १ ॥ १ ॥

श्रीकृष्णाय नमः ॥

यत्कृपालेशलाभेन लभतेऽभिमतं पदम् ।
तस्याजस्य जनो नौमि नित्यं पादाम्बुजद्वयम् ॥

निखिलशास्त्रविचारविशारदः कुसुमसूनुरिमं बहुयत्नतः ।
भजनरत्नप्रकाशश्लोककैर्वितनुते संग्रहं महतां कृते ॥

अथ श्रीभगवन्नारायणांशसमुद्भूतवेदव्यासविरचिताष्टदशपुराणान्तर्गत-श्रीभागवतमहापुराणस्य पुराणसूर्यस्य भगवद्भक्तिपरश्लोकान्नानाख्यसमूहेषु शास्त्रादिष्वीरितं प्रतिपाद्यपरमदेवतानुलक्षणमंगलनिःप्रत्यूहसमाप्तिकारणं चिकीर्षुः भक्तिरत्नाकराख्यमष्टत्रिंशन्निर्णयात्मकमाख्यातुमादौ तावन्नाममहिमान[मुक्त्वा भजनीयं] कथयन् स्वहृद्युपास्ते । यन्नामेति ।

यस्य नामधेयं नाम तथा च । "आख्याह्वे अभिधानं च नामधेयं च नाम चे"ति । भवाब्धि भवः संसारः अब्धिरिव [दु]रवगाहो दुष्पारश्च तम् । भवो जन्ममहेश्वरौ । भवशब्देन जन्मनरुपलक्षणया संसार उक्तः । "समुद्रोऽब्धिरकूपार" इति । अञ्जसेति तृतीयान्तप्रतिरूपकाव्ययम् । "स्राग्झटित्यञ्जसाह्नाय द्राङ्मंक्षु सपदि द्रुते" इति सपद्यर्थे । तर्या नावा "[स्त्रियां] नौस्तरणिस्तरी"ति सम्यगुत्तीर्याश्रयमात्रेण नावमनपेक्ष्यैव तीरं [लभते] ॥ तथा चोक्तम् ।

---

१ श्रीकृष्णः शरणम्—KA १ गणेशाय नमः । The verse यत्कृपालेशलाभेन comes as the second one after यन्नामधेयेन in the KA ms. with पदपल्लवद्वयम् for पादाम्बुजद्वयम् । Manuscript N does not have its first folio containing v. 1/1 and its commentary. This is provided here from Kb.

Marfat.com

स्वयं समुत्तीर्य सुदुस्तरं द्युमनभवार्णवम्भीममदभ्रसौहृदाः ।
भवत्पदाम्भोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवान् ॥

इत्युक्ते ॥ नर इति । जात्यपेक्षयैकवचनम् । ततस्तान्यघानि पूयन्ते तपोदानजपादिभिः नामधर्मजं हृदयं तदपीशांघ्रिसेवया ॥ टी० ॥ ईशांघ्रिसेवया कीर्तनादिरूपया [य]तो जात्याश्रममन्तरेण नरमात्रः यः सोऽपीत्यर्थः । नामग्रहणेऽधिकाराभावोक्तेः । परमत्युत्कृष्टं पदः स्थानं स्वरूपं वा । प्राप्नोति लभते । पातकशब्देन दशविधमप्युपलक्षणया गृहीतं पातयतीति पातकः महापातकाद[य]श्च । ते च सन्त्यस्येति इन् । अन्यथा विरोधापत्तेः कर्मप्रायश्चित्तेष्विव नात्र महत्त्वाल्पत्वनियमस्तैस्तानीत्युक्तेः । तथा च—

स्तेनः सुरापो मित्रध्रुग् ब्रह्महा गुरुतल्पगः ।
स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे ॥
सर्वेषामप्यघवतामिदमेव सुनिष्कृतम् ।
नामव्याहरणं विष्णोर्यतस्तद्विषया मतिरिति ॥

अपरम्—

ब्रह्महा पितृहा गोघ्नो मातृहाचार्यहाधवान् ।
श्वादः पुक्कशको वापि शुध्येरन् यस्य कीर्तनात् ॥

पद्मपुराणे—

सर्वधर्मोज्झिता विष्णोर्नाममात्रैकजल्पकाः ।
सुखेन यां गतिं यान्ति न तां सर्वेऽपि धार्मिकाः ॥ इति ।

सदेति देशकालपात्राभावेऽपि तथा चोक्तम्—

न देशनियमः कश्च न काले नियमः तथेति ।

अपरमपि—

रथांगपाणेर्नामानि सदा सर्वत्र कीर्तयेत् ।
नाशौचं विद्यते तत्र स पवित्रकरो यतः ॥

कर्तृनियमस्तु नरपदेन न्यस्तः । एवंभूतं सदानन्दं सतो भक्तानानन्दयतीति सनन्दो यश्च वा स चापारनन्दश्चेति । आनन्दमयं ब्रह्मेति श्रुतेः । हृदीति मनसि "स्वान्तं हृन्मानसम्मनः" इति आनन्दमयब्रह्मणि कायकृतनत्याद्यगोचरत्वात् उपासनमात्रमेव युक्तम् । यद्वा हृद्यधिष्ठाने कृष्णावतारिरूप "कृषिर्भूवाचकः शब्दो" इत्युक्तेः बहुवचनं माधवादिर ··· ·· (?) स्वाभिप्रायेण तं वयमुपास्महे आश्रयामहे । यथा हि—

या वै साधनसम्पत्तिः पुरुषार्थचतुष्टये
तया विना तवाप्नोति नरो नारायणाश्रयः ।

Marfat.com

समुद्धृतं भागवताभिधानदुग्धाम्बुधेर्यन्नवनीतपिण्डम् ।
श्रीशंकरेणाच्युतकिंकरेण बुद्ध्या जुषध्वं शितया सुधीराः ॥ २ ॥ २ ॥

समस्तशास्त्रसत्सारमुद्धृत्य विदधेऽधुना ।
भक्तिरत्नाकराख्यं तत् संग्रहं शंकरः किल ॥ ३ ॥ ३ ॥

इत्युपपन्नं सर्वं आत्मार्थमात्मनेपदम्
तद्विषयानामव्याहारकपुरुषविषयामपि ॥
योऽयं मया सर्वतो रक्षणाय इति [॥] [१॥] १ ॥

स्वग्रन्थाभिधेयमुक्त्वा प्रयोजनमाह । भागवतमित्यभिधानं यस्य स चासौ दुग्धाम्बुधिः क्षीरसमुद्रः तस्मात् श्रीशंकराख्येन सम्यगुद्धृतं नवनीतपिण्डवत् घनतररसद्रव्यसञ्चयम् । हे सुधीराः शोभनया धिया राजमानाः शास्त्रज्ञाः भक्ताः जुष प्रीतिसेवने श्रवणादरेण सेवनं कुरुध्वम् । अच्युतकिंकरेणेति औद्धत्यं परिहृत्य स्वहृद्यं भगवत्यर्पितं कृतम् । नवनीतपिण्डभक्षणे दद्भिरवखण्डनं भक्षणश्रमो नास्ति ॥ तथा सुखेनोपविष्टाः श्रवणं कुरुतेति सम्यगुक्ता । धीरा इति धीराणां श्रवणमेव कर्त्तव्यमित्यर्थः । शितया तीक्ष्णया बुद्ध्या बुद्धेरपीदमेव चातुर्यमिति ॥ २ ॥ २ ॥

वैशिष्ट्यमाह । समस्तशास्त्राणां सद्भिर्गृहीतं सारमुद्धृत्य किल प्रसिद्धं भक्तिरत्नानामुद्भवक्षेत्रमिव संग्रहम् ॥ ३ ॥ ३ ॥

अथ भक्तिज्ञानप्रदगुरुरत्यन्तपूज्य इत्याह—

पतिहीना यथा नारी सर्वकर्मविवर्जिता ।
गुरुहीना तथा विद्या इत्यादावयमुच्यते ॥

१टी The whole commentary from श्रीकृष्णाय नमः is not in KA.
२ N starts with v. 2/2.
जुषध्वं—N, Kb, KA युषध्वं
बुद्ध्या—Kb, N भक्तया
२टी N (worm-eaten) starts with माहः भागवतमित्यभिधानं ··· ···.
शास्त्रज्ञाः भक्ताः—not in Kb
जुष—N, Kb युष
औद्धत्यं—Kb औधृत्यं, N ईधृत्यं
सम्यगुक्ता—Kb सम्यक्ता उक्ता
The whole com. on v. 2 is not in KA.

Marfat.com

स वै सत्कर्मणां साक्षाद् द्विजातेरिह सम्भवः ।
आद्योंऽग यत्राश्रमिणां यथाहं ज्ञानदो गुरुः ॥ ४ ॥ ४ ॥

नन्वर्थकोविदा ब्रह्मन् वर्णाश्रमवतामिह ।
ये मया गुरुणा वाचा तरन्त्यञ्जो भवार्णवम् ॥ ५ ॥ ५ ॥

नाहमिज्याप्रजातिभ्यां तपसोपशमेन वा ।
तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ॥ ६ ॥ ६ ॥

श्रीभागवते दशमस्कन्धेऽशीत्यध्याये भगवान् दरिद्रब्राह्मणं प्रति भक्तिज्ञानदाता गुरुरत्यन्तपूज्य इति त्रीन् गुरूनाह । इह संसारे यत्र सम्भवः जन्ममात्रं स पिता तावदाद्यो गुरुः स पूज्यः अन्यच्छ्वशुरादिभ्यः यद्गुरुभ्यः ॥ कर्मविद्याप्रदं गुरुमाह द्विजातेरित्युपलक्षणं शूद्रादीनामपि सतः पुंसो वर्णाश्रमवतः यत्र सत्कर्मणाम् उपनयनवेदाध्ययनसंस्कारकर्मणां यत्र सम्भवः उपनीय वेदाध्यापकः, शूद्रादीनां विवाहषट्कर्मश्राद्धादीनां यत्र सम्भवः 'विवाहमात्रं संस्कारं शूद्रोऽपि लभतां सदे'ति स्मृतेः पौरोहित्यः । स द्वितीयो गुरुः प्रथमादपि पूज्य इत्यर्थः । ब्रह्मविद्याप्रदं गुरुमाह । आश्रमिणामिति सर्वेषां ज्ञानदो गुरुः यथाहं अहमीश्वरः यथा तथा साक्षादहमित्यर्थः ॥ ४ ॥ ४ ॥

अतएव तमाश्रित्य ये तरन्ति ते बुद्धिमन्त इत्याह । ननु ब्रह्मन् वर्णाश्रमवतां मध्ये ते पुरुषार्थनिपुणाः ये वर्णाश्रमवत्त्वे मत्स्वरूपेण गुरुणा वाचा उपदेशेन अञ्जः सुखेन संसारसमुद्रं तरन्तीति ॥ ५ ॥ ५ ॥

ज्ञानदातुरधिकः सेव्यो नास्तीत्युक्तम् । तद्भजनादधिको धर्मो नास्तीत्याह । इज्या पूजा गृहस्थधर्मः । प्रजातिः ब्रह्मचारिधर्मः ताभ्याम् । तपो वनस्थधर्मः

४टी KA अथ प्रथममत्र भक्तिज्ञानप्रदगुरुशेष[सेवा]माहात्म्यमाह । दशमस्कन्धे अशीत्यध्याये दरिद्रदामोदरं प्रति भगवद्वाक्यम् भक्तिज्ञानप्रदगुरुरत्यन्तपथः[पूज्यः] इत्याशयेन त्रीन् गुरूनाह । इह संसारे यत्र सम्भवो जन्ममात्रं यस्मात् सः पिता तावदाद्यः प्रथमो गुरुः पूज्यः । कर्मविद्याप्रदं गुरुमाह । द्विजातेः सम्भवः पुंसः सत्कर्मणां यत्र सम्भवः उपनयनपूर्वकवेदाध्ययनम् । स द्वितीयो गुरुः । यथाहमीश्वरः । तथा प्रथमादपि पूज्यः । ब्रह्मविद्याप्रदं गुरुमाह । आश्रमिणामपि सर्वेषां ज्ञानदो गुरुः स तु साक्षादहमेव ।

५टी तरन्ति—Kb भवन्ति

६टी KA ज्ञानप्रदाद्गुरोरधिकसेव्यो नास्तीत्युक्तम् । अतएव गुरुभजनादधिको धर्मो नास्तीत्याह । इज्या गृहस्थधर्मः प्रजातिः ब्रह्मचारिधर्मः ताभ्यां तपसा वनस्थधर्मेण उपशमेन संन्यासधर्मेण वा परमेश्वरो न तुष्येयं यथा गुरुशुश्रूषयेति ।

Marfat.com

तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ।
शाब्दे च परे निष्णातं ब्रह्मण्युपसमाश्रयम् ॥ ७ ॥ ७ ॥

भ्रातृव्यमेनं तदद्भ्रवीर्यमुपेक्षयाध्येषितमप्रमत्तम् ।
गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोषम् ॥ ८ ॥ ८ ॥

उपशमः समता संन्यासधर्मः । तेन तेन च अप्यर्थे चकारः । अहं परमेश्वरः तुष्येयं न तथा यथा गुरुशुश्रूषयेति । कीदृशः सर्वभूतानां ब्रह्मादितृणपर्यन्तानामात्मान्तर्यामी भोक्ता । अतो मयि तुष्टे सर्वभूतानि तुष्यन्तीति भावः ॥ उक्तञ्च "त्वयि तुष्टे जगत्तुष्टमि"ति ॥ ६ ॥ ६ ॥

एकादशे तृतीयाध्याये प्रबुद्धः उत्तमं श्रेयो ज्ञातुमिच्छुः शाब्दे ब्रह्मणि वेदाख्ये न्याययुक्त्यातो निष्णातं तत्त्वज्ञं ततोऽन्यथा संशयनिरासकत्वायोगात् परे ब्रह्मण्यपरोक्षानुभवेन अन्यथाबोधसञ्चारायोगात् परब्रह्मणि निष्णाते द्योतकमाह उपसमाश्रयमिति ॥ ७ ॥ ७ ॥

पञ्चमस्कन्धे बहुगणं प्रति जडभरतः गुरुसेवया संसारनिस्तारमाह भ्रातृव्यं शत्रुम् अध्येषितं सम्वर्धितं स्वयं व्यलीकं मिथ्याभूतमप्यात्मानं मुष्णातीत्यात्ममोषं गुरुरेव हरिस्तस्य चरणोपासनमेवास्त्रं यस्य तथाभूतः सन् जहीति घातय इत्यर्थः ॥ ८ ॥ ८ ॥

इत्यादिवचनानुसारेण कृष्णैकशरणतया गुरुसेवयैव
संसारनिवृत्तिरिति निर्णीतं श्रीभक्तिरत्नाकरे ॥ * ॥ १ ॥ * ॥

---

७ परे—N परि-

८टी बहुगणं—It is to be noted that in all Assam texts this name is nowhere रहुगण.

जडभरतः—Kb भरतः .

KA ends the chapter with the verse :

यस्य भक्तिर्भगवति ज्ञान[दी]पप्रदे गुरौ ।
सक्तया (?) इति प्रसद्धाञ्च सर्व्वकुञ्जरशौचवत् [?] ॥

This seems to be an unwanted and wrong addition of the copyist.

Marfat.com

॥ २ ॥ नृदेहमाहात्म्यम् ॥

नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम् ।
मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं न तरेत्स आत्महा ॥ १ ॥ ९ ॥

लब्ध्वा सुदुर्लभमिदं बहुसम्भवान्ते
मानुष्यमर्थदमनित्यमपीह धीरः ।
तूर्णं यतेत न पतेदनुमृत्यु याव-
न्निःश्रेयसाय विषयः खलु सर्वतः स्यात् ॥ २ ॥ ९क ॥

अथ नृदेहमाहात्म्यम् एकादशे विंशाध्याये भगवद्वाक्यम् एवमप्रयतं प्रमत्तं निन्दति । नृदेहं प्लवं नावं प्राप्येत्यध्याहारः यो भवाब्धिं न तरेत् स आत्महा तत्र हेतुः । आद्यं सर्वफलानां मूलं तदुपार्जितकर्मभिः सर्वप्राप्तेः सुदुर्लभम् उद्यमकोटिभिरपि प्राप्तुमशक्यं सुलभमिति यदृच्छालब्धं सुकल्पं पटुतरसर्वेन्द्रियं गुरुः संश्रितमात्रेण कर्णधारः तम् । मया स्मृतमात्रेणानुकूलमारुतेन प्रेरितम् ॥ १ ॥ ९ ॥

तत्र नवमाध्याये दत्तात्रेयः तस्मात् बहूनां सम्भवानां जन्मनामन्ते मानुष्यं देहं लब्ध्वा तच्चानित्यं सदप्यर्थदं सर्वपुरुषार्थप्रापकं दैवाल्लब्ध्वा । किम्भूतं अनु

१,१टी सुकल्पं Kb, N, KA—Db सुकल्पं

१टी प्रमत्तं—N. (absent)

हेतुः—KA हेतवः

तदुपार्जित- —Kb एतदुपार्ज्जित-

सर्वप्राप्तेः—KA सर्व्वप्राप्तेः । किञ्च

सुलभमिति—KA तथापि तु सुलभं

यदृच्छालब्धं — KA यदृच्छया लब्धत्वात् तञ्च

पटुतरसर्वेन्द्रियं—KA पटुतरं किञ्च,

कर्णधारः—KA कर्णधारो नेता यस्य तम्

मया ... प्रेरितं ॥ Kb—N (absent)

Marfat.com

स्वर्गिणोऽप्येतदिच्छन्ति लोकं निरयिणस्तथा ।
साधकं ज्ञानभक्तिभ्यामुभयं तदसाधकम् ॥ ३ ॥ १० ॥

मल्लक्षणमिमं कायं लब्ध्वा मद्धर्म आस्थितः ।
आनन्दं परमात्मानमात्मस्थं समुपैति माम् ॥ ४ ॥ ११ ॥

येऽभ्यर्थितामपि च नो नृगतिं प्रपन्ना
ज्ञानञ्च तत्त्वविषयं सहधर्म यत्र ।
नाराधनं भगवतो वितरन्त्यमुष्य
सम्मोहिता विततया वत मायया ते ॥ ५ ॥ १२ ॥

अनन्तरं मृत्यवो यस्य । तद्यावन्न पतेत्तावत्तूर्णं शीघ्रं यथा भवेत् तथा निःश्रेयसाय मोक्षाय यतेत यत्नं कुर्यात् । विषयः पुनः सर्वतः पश्वादियोनावपि स्यात् ॥ २ ॥ ९क ॥

तथा विंशाध्याये भगवद्वाक्यम् । अनेन प्रकारेण ज्ञानभक्तिसाधनत्वान्नरदेहं स्तौति । निरयिण इति दृष्टान्तत्वेनाह । ज्ञानभक्तिभ्यां ज्ञानभक्त्योः साधकम् उभयं स्वर्गिनरकिशरीरम् ॥ ३ ॥ १० ॥

तथा षड्विंशे मोक्षप्रदत्वान्नृदेहं स्तौति । मम स्वरूपं लक्ष्यते येन तत् । मद्धर्मे मद्भक्तिलक्षणे धर्मे । आत्मस्थमात्मन्येव नियन्तृत्वेन स्थितं परमानन्दरूपमात्मानं सम्यक् प्राप्नोतीति ॥ ४ ॥ ११ ॥

तृतीये पञ्चदशे ब्रह्मा प्रसंगादभक्तं शोचति । नोऽस्माकं ब्रह्मादीनां प्रार्थितां मनुष्यजातिं प्राप्ता ये हरेराराधनं न कुर्वन्ति । कीदृशीं यस्यां धर्मसहितं तत्त्वज्ञानं भवति । उभयसाधनत्वात् तेऽमुष्य भगवतः विततया मायया सम्यङ्मोहिताः । वत खेदे च निश्चये शोच्यास्ते ॥ ५ ॥ १२ ॥

५टी तृतीये पञ्चदशे ब्रह्मा—KA तृतीये वैकुण्ठवर्णने ब्रह्मणो वाक्यम् ॥

Marfat.com

लब्ध्वा जनो दुर्लभमत्र मानुषं
कथञ्चिदव्यक्तमयतत्नतोऽनघ ।
पादारविन्दं न भजत्यसन्मति-
र्गृहान्धकूपे पतितो यथा पशुः ॥ ६ ॥ १३ ॥

यः प्राप्य मानुषं देहं मुक्तिद्वारमपावृतम् ।
गृहेषु खगवत् सक्तस्तमारुढच्युतं विदुः ॥ ७ ॥ १४ ॥

प्राप्ता नृजातिन्त्विह ये च जन्तवो
ज्ञानक्रियाद्रव्यकलापसम्भृताम् ।
न चेद्यतेरनपुनर्मृताय ते
भूयो वनौका इव यान्ति बन्धनम् ॥ ८ ॥ १५ ॥

दशमे मुचुकुन्दः । कामसुखं शूकरादिदेहेऽपि भवति भगवद्भजनन्तु न मनुष्यव्यतिरेक इति । अतो मानुषत्वं प्राप्य त्वामभजन्नतिमूढ इत्याह । अत्र कर्मभूमौ भारतवर्षे अविकलांगम्पटुतरसकलेन्द्रियं असति विषये मतिर्यस्य सः । गृहमेवान्धकूपस्तस्मिन् पशुर्यथा तृणलोभेन गर्ते पततीति तद्वत् ॥ ६ ॥ १३ ॥

एकादशे सप्तमे दत्तः गृहासक्तिस्तिरश्चामपि अनर्थहेतुर्मनुष्यस्य त्वतिनिन्दिता इत्याह । अपगतमावृतमावरणं यस्मात् । पूर्वमारुह्य पश्चाच्च्युत इव ॥ ७ ॥ १४ ॥

पञ्चमे ऊनर्विंशे देवा अपि एवमप्रयतमानं नरं निन्दन्ति । ज्ञानं शास्त्रोक्तं तदर्था क्रियाश्च तदर्थकानि द्रव्याणि च तेषां कलापः समूहस्तेन सम्भृतां सम्पूर्णाम् ।

---

६ N -व्यक्तमयत्नतो—Kb -व्यंगमयन्नतो, KA -वांसनजन्मतो
भजत्य- —N, Kb भजन्त्य-

६टी भारतवर्षे...मतिर्यस्य—KA अवांसं अविकलांगं असति विषयसुखे आसक्ता मतिर्यस्य

८टी शास्त्रोक्तं—शास्त्रोत्थं ?
ज्ञानं ... ... तद्वत्—KA प्राप्तज्ञानञ्च तदर्थाः क्रियाश्च तदर्थानि द्रव्याणि च तेषां कलापेन सम्भृतां पूर्णाम् पुनरमृताय मोक्षाय वनौका इव वनौकसः पक्षिणो यथा लुब्धान्मुक्ता अपि पुनर्यदि तस्मिन्नेव वृक्षे प्रमत्ता विहरन्ति तर्हि यथाबिध्यन्ति तद्वत् ।

Marfat.com

तेषां दुरापं किम्वान्यन्मर्त्यानां भगवत्पदम् ।
भुवि लोलायुषो ये वै नैष्कर्म्यं साधयन्त्युत ॥ ९ ॥ १६ ॥

स वञ्चितो बतात्मध्रुक् कृच्छ्रेण महता भुवि ।
लब्ध्वापवर्ग्यं मानुष्यं विषयेषु विषज्जते ॥ १० ॥ १७ ॥

शुभमिदमुपलभ्य मानुषत्वं सुकृतवशेन बृथेन्द्रियार्थहेतोः ।
रमयति कुरुते न मोक्षमार्गं स दहति चन्दनमिव भस्महेतोः ॥ ११ ॥ १८ ॥

अपुनर्मृताय मोक्षाय बनमोको यस्य सः पक्षी लुब्धकान्मुक्तः प्रमत्तः सन् यदि तस्मिन् बने विहरति बन्धनं याति ते तद्वत् ॥ ८ ॥ १५ ॥

चतुर्थे त्रयोविंशे देववाक्यं भगवान् पद्यतेऽनेन तत् ज्ञानं नैष्कर्म्यं कर्मभिः सकामैः प्राप्तुमशक्यम् । चञ्चलायुषो मर्त्याः मनुष्याः तेषामन्यद्देवादिपदं वा प्रसिद्धया किं दुर्लभं न किञ्चिदित्यर्थः ॥ ९ ॥ १६ ॥

अभक्तं शोचति । बत खेदे । आत्मने द्रुह्यतीत्यात्मध्रुक् योऽपवर्गसाधनं मानुष्यं मनुष्यदेहं लब्ध्वापि विषयेषु विषज्जते ॥ १० ॥ १७ ॥

नरसिंहपुराणे नवमाध्याये यमस्य वाक्यं रमयतीन्द्रियाणीति भस्मनिमित्तं चन्दनतरुं दहति यथा अज्ञः ॥ ११ ॥ १८ ॥

N. has the following after the commentary on verse 8 :

यः पूर्व्वं मीनरूपी पुनरवणिधरः कूर्म्मरूपी चकोरः
पश्चात् सिंहार्धदेहं तनुबलिरिपुर्व्वामनाख्यो महात्मा ।
रामं श्रीरामरामौ तदनुतनुपरौ बुद्धकल्किद्विरूपौ
सोऽयं श्रीकान्तदेहः दशभिरवतारैः ... ... ॥

वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते
दैत्यं दारयते बलिं छलयते क्षत्राः क्षयं कुर्व्वते ।
पौलस्त्यं जयते हलं कलयते कारुण्यमातनुते
म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥

रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवा-
मभ्यर्णे परि ... ... (?) ।
साधुत्वभ्रुणं स्वधामयमिति व्याहृत्य गीतस्तुति-
व्याजादुद्भटचुम्बितः स्मितमनोहारी हरिः पातु वः ॥

Marfat.com

लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसम्भवाम् ।
आत्मानं यो न बुध्येत न क्वचित् क्षेममाप्नुयात् ॥ १२ ॥ १९ ॥

षष्ठस्कन्धे षोड़शाध्याये चित्रकेतुं प्रति अनन्तः । योऽनन्तरेऽपि भोगादि-सम्पादनं शक्यं ज्ञानार्थमत्रैव यतितव्यमित्याह । ज्ञानं शास्त्रोक्तं विज्ञानम-परोक्षानुभवः तयोः सम्भवो यस्याम् ॥ १२ ॥ १९ ॥

इत्यादिवचनानुसारतः नृदेहं प्राप्य एकशरण्यहरिन्नभजन्तोऽभिनिन्दिता
इति निर्णीतं भक्तिरत्नाकरे ॥ ❀ ॥ २ ॥ ❀ ॥

श्रीकृष्ण कृष्ण कृतवृष्णिकुलावतार संसारवारणविदारणसिंह विष्णो ।
गोपीजनोपकृतदोहनगोपीकान्त गोपाल पालय कृपालय मामपायात् ॥

९-१० These verses (*Bhag-p.*, IV. 23.27-28) do not appear in the KA ms. In their place *Nāradiya-p.*, 32.36, 32.32, are cited. It is remarkable that in their renderings Gopālacaraṇa Dvija takes up the *Bhag.* verses, while Rāmacaraṇa the *Nāradiya-p.* ślokas.

१२टी शास्त्रोक्तं—शास्त्रोत्थं ?

Marfat.com

॥ ३ ॥ सत्संगमाहात्म्यम् ॥

तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ।
भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥ १ ॥ २० ॥

दुरापा ह्यल्पतपसः सेवा वैकुण्ठवर्त्मसु ।
यत्रोपगीयते नित्यं देवदेवो जनार्दनः ॥ २ ॥ २१ ॥

सतां प्रसंगान्मम वीर्यसंविदो
भवन्ति हृत्कर्णरसायनाः कथाः ।
तज्जोषणादाश्वपवर्गवर्त्मनि
श्रद्धा रतिर्भक्तिरनुक्रमिष्यति ॥ ३ ॥ २२ ॥

अथ सत्संगमाहात्म्यम् ॥ प्रथमस्कन्धेऽष्टादशाध्याये शौनकः । भगवत्संगिनो विष्णुभक्ताः तेषां संगस्य लवेन अल्पमात्रकालेन स्वर्गमपवर्गञ्च न तुलयामः तुल्यं न पश्यामः । मर्त्यानामाशिषो भोगाद्या न तुलयाम इति किं वक्तव्यम् ॥ १ ॥ २० ॥

तृतीयस्कन्धे सप्तमाध्याये विदुरो मैत्रेयमभिनन्दति । अहो दुर्लभं लब्धं मयेत्याह । दुरापा दुर्लभाः वैकुण्ठस्य विष्णोस्तल्लोकस्य वा वर्त्मसु मार्गभूतेषु महत्सु । यत्र येषु जनयति सर्वं जगदिति जना माया भक्तस्य तामर्दयतीति जनार्दनः । महत्सेवया हरिकथाश्रवणं ततो हरौ प्रेम ततो देहानुसन्धाननिवृत्तिरिति तात्पर्यम् ॥ २ ॥ २१ ॥

तथा पञ्चविंशाध्याये कपिलः । सत्संगस्य भक्त्यंगतामुपपादयति । वीर्यस्य सम्यग्वेदनं यासु ताः हृन्मनः कर्णौ च तेषां रसायनाः अत्यन्तसुखदाः तासां जोषणात् सेवनात् अपवर्गोऽविद्यानिवृत्तिर्यस्य तस्मिन् हरौ प्रथमं श्रद्धा ततो रतिस्ततो भक्तिरनुक्रमेण भविष्यतीत्यर्थः ॥ ३ ॥ २२ ॥

१टी शौनकः — KA शौनकादिवाक्यम् सत्संगमभिनन्दति

३टी अत्यन्तसुखदाः — Kb अतिसुखदाः

Marfat.com

भक्तिं मुहुः प्रवहतां त्वयि मे प्रसंगो
भूयादनन्तमहताममलाशयानाम् ।
येनाञ्जसोल्वणमुरुव्यसनं भवाब्धिम्
नेष्ये भवज्जनकथामृतपानमत्तः ॥ ४ ॥ २३ ॥

क्षणार्धेनापि तुलये न स्वर्गं नापुनर्भवम् ।
भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥ ५ ॥ २४ ॥

अथानघांघ्रे तव कीर्तितीर्थयो-
रन्तर्बहिःस्नानविधूतपाप्मनाम् ।
भूतेष्वनुक्रोशसुसत्त्वशीलिनां
स्यात् संगमोऽनुग्रह एष नस्तव ॥ ६ ॥ २५ ॥

चतुर्थस्कन्धे नवमाध्याये ध्रुवः । तव कथाश्रवणाय सत्संगं देहीत्याह। भक्तिं प्रवहतां सातत्येन कुर्वतां सतां संगो मे भूयात् । ननु किं मोक्षं न याचसे इत्यत आह । येन सत्संगेन भवाब्धिं उरूणि व्यसनानि यस्मिन् तथाभूतमपनेष्ये अञ्जसानायासेन सुखेनेत्यर्थः पारं गमिष्यामि ॥ ४ ॥ २३ ॥

तत्रैव चतुर्विंशाध्याये रुद्रः त्वत्पादमूले शरणं प्रविष्टस्य कृतान्तभयाभावः कियाँल्लाभः । यतः त्वद्भक्तस्य संग एव सकलपुरुषार्थश्रेणिशिरसि नरीनर्तीत्याह क्षणार्धेनेति । आशिषः राजादिसम्पदः ॥ ५ ॥ २४ ॥

पुनस्तदेवाह । अनघावघहरावंघ्री यस्य सः तव कीर्तियशः तीर्थं गंगादि तयोः अन्तर्बहिःस्नानाभ्यां विनष्टपापानाम् । भूतमात्रेष्वनुक्रोशः कृपासुसत्त्वमा-

---

४टी उरूणि व्यसनानि यस्मिन् तथाभूतमपनेष्ये— KA (absent)

५टी कियाँल्लाभः— N, Kb कियाल्लाभः
क्षणार्धेणेति ··· सम्पदः—Not in KA

६ This verse is not in this position (but after vv. 12-13) in KA, Db. It is not rendered by Rāmacaraṇa; but Gopālacaraṇa gives his rendering.

६टी KA पुनस्तदेवाह—Kb (absent), N रुद्रगीतायामेवं रुद्रेण कथितं, erased (?) in Kb.

Marfat.com

न ह्यद्भुतं त्वच्चरणाब्जरेणुभि-
र्हतांघसो भक्तिरधोक्षजेऽमला ।
मौहूर्तिकाद्यस्य समागमाच्च मे
दुस्तर्कमूलोऽपहतोऽविवेकः ॥ ७ ॥ २६ ॥

भवापवर्गो भ्रमतो यदा भवे-
ज्जनस्य तर्ह्यच्युत सत्समागमः ।
सत्संगमो यर्हि तदैव सद्गतौ
परावरेशे त्वयि जायते मतिः ॥ ८ ॥ २७ ॥

न ह्यप्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनन्त्युरुकालेन दर्शनादेव तु साधवः ॥ ९ ॥ २८ ॥

